Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथानुष्टुप्मन्त्रप्रसङ्गात् अनुष्टुप्त्रयमपि वैरिञ्चिकल्पोक्तमायुष्करमत्र योग्यतावशात् लिख्यते —

विधिब्रह्ममैत्रावरुणिवसिष्ठा ऋषयः । अनुष्टुभः छन्दांसि । ब्रह्मनृसिंहविष्णुत्र्यम्बकरुद्रा देवताः । मन्त्रे स्थिता हलो बीजानि । मन्त्रे स्थिताः स्वराश्शक्तयः । परमात्मज्ञानद्वारा तत्प्रीत्यर्थे विनियोगः । मूलमन्त्रैरेकैकैरर्धीकृत्य क्रमेण षडङ्गानि ॥ ध्यानम् —

हेमाम्भोजे निषण्णं स्रवदमृतघटौ चक्रशङ्खौ कराब्जैः
अक्षस्रक्कुण्डिकाख्ये शशिशकलधरं धारयन्तं त्रिरूपम् ।

हेमाभं पीतवस्त्रं रविशशिदहनत्रीक्षणं चित्स्वरूपं
सर्वज्ञं सर्वगं तं विधिहरिहरजं विश्वरूपं नमामि ॥

एतत् समष्टिध्यानम् । व्यष्टिध्यानमुच्यते —

पद्मोद्भवं वेदनिधिं पुराणं चतुर्मुखं रक्ततनुं द्विनेत्रम् ।
स्रुचं स्रुवं कुम्भमथाक्षमालां दधानमाद्यं प्रणमामि देवम् ॥ इति ॥

द्वितीयस्य ध्यानं जान्वोरासक्तेत्यादि नृसिंहविधानोक्तम् । तृतीयं अच्छस्वच्छारविन्दे इत्यादि त्र्यम्बकविधाने उक्तम् ॥

ओं हंसात्मको यो अपामग्नेस्तेजसा दीप्यमानः ।
स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिः ॥ १ ॥

ओं उग्रं वीरं महाविष्णुं इत्यादि ॥ २ ॥

ओं त्र्यम्बकं यजामहे इत्यादि ॥ ३ ॥ ओं ॥

इत्यनुष्टुप्त्रयाख्यो मन्त्रः अतिरहस्यतरः । आयुःप्रधानोयं मन्त्रः । प्रणवचतुष्टयेन साकं शताक्षरी ॥

अथास्यैवानुष्टुप्त्रयस्य मन्त्रविशेषः —

ओं ह्रीं हंसः सोहं स्वाहा । इत्यात्मज्ञानप्रदो मन्त्रः । सहस्रज्वालिनी मृत्युनाशिनी स्वाहा । इत्यायुःपरीक्षामन्त्रः । अनेन प्रयोगः —

त्रिवारमेनं दिनशो मन्त्रविद्दक्षिणामुखः ।
जप्त्वा संख्यासु गणयेदक्षरान्मन्त्रसंभवान् ॥

*आज्यं गोपियुतं मन्त्रो द्वादशार्णो भवेद्यदि ।
तदाप्रभृति विज्ञेयं वत्सरादात्मनो मृतिः ॥

---

*आद्यं गोपीयतन्मन्त्रो इति ख, ग, घ, मातृकापाठः ।

अयमर्थः— इमं मन्त्रं दिनशः त्रिवारं जप्त्वा त्रयोदशाक्षराणि परिगणयेत् । यदा च द्वादशाक्षराणि भवन्ति तदाप्रभृति संवत्सरात् प्राक् मृतिरिति ज्ञेयम् ॥

प्रयोगान्तरम्—

साधं तैलं घृतं सम्यक् क्वथयेन्मिळितं निशि ।
मन्त्रजप्तं तु तद्गुप्तं रोगार्तनिकटे स्थितम् ॥

प्रभाते यदि संपश्येपृथक्त्वं घृततैलयोः ।
सप्ताहान्मरणं तस्य विद्यते नात्र संशयः ॥

प्रयोगान्तरम्—

रसे केवलदूर्वायाः स्वांगुष्ठद्वयसे निशि ।
तन्मन्त्रपुटितं नाम लिखितं काञ्चनं क्षिपेत् ॥

नान्यदृष्टं तु संजप्तं पश्येन्मन्त्रं जपन्मनुम् ।
वैवर्ण्यं वा हिरण्यस्य छायया वाप्यदर्शनम् ॥

व्याधिस्तु जायते तस्य विकीर्णं तत्तु काञ्चनम् ।

अयमर्थः—

अंगुष्ठनिमग्नप्रमाणे दूर्वारसे, काञ्चनपट्टे मन्त्रवर्णपुटितं साध्यनाम विलिख्य तस्मिन् रसे विनिक्षिपेत् । तद्रसमन्यैर्यथा अदृश्यं भवति तथा कृत्वा अनुष्टुप्त्रयं जप्त्वा प्रातःकाले पश्येत् । तद्यन्त्रे वैवर्ण्यं वा आत्मच्छायाया अदर्शनं वा विकीर्णतां वा यदि पश्येत् तस्यालस्यं (व्याधिः) भवति ॥

प्रयोगान्तरम्—

अन्तश्शून्यार्कच्छायायां मण्डलान्मरणं भवेत् ।

प्रयोगान्तरम्—

अर्धं दूर्वारसं मूत्रं पशोः प्रस्थार्धकं पिबेत् ।
जरं यदि वमेत्पीतं तं विद्यान्मृत्युहस्तगम् ॥

अनुष्टुप्त्रयं लक्षं जपेत् । खादिरेन्धनकृताग्नौ त्रिमधुरसिक्ताभिः अयुतं पुरश्चरणाहोमः । तत्संपातं च प्रकाशयेत् (प्राशयेत्) ।

तमग्निं सर्वमादाय घटे प्रज्वाल्य तं वहन् ।
ग्रीवादघ्नजले स्थित्वा जपेद्दशशतं पुनः ॥

अनेन कर्मणा तस्य प्रसीदति *हरिः स्वयम् ।
अञ्जलिप्रभृतिं कृत्वा मृत्युर्नायाति भीतवत् ॥

चित्रगुप्तेन लिखितं यत्कर्मास्य पटे स्वके ।
तत्सर्वं क्षाळ्यते तेन जपमात्रेण मन्त्रिणः ॥

एवं तु पुनरावृत्त्या गन्धर्वायुरवाप्नुयात् ।
देवकालसमं जीवेदावृत्त्या च तृतीयया ॥

जीवेत्स चतुरावृत्त्या ब्राह्मं कालं न संशयः ।
दक्षिणा गुरवे कार्या समाप्तौ तत्र तत्र च ॥

हेमनिष्कशतं पूर्वं द्वितीये द्विगुणं ततः ।
तृतीये त्रिगुणं दद्याचतुर्थे तु चतुर्गुणम् ॥

अथ उत्तीर्य तं वह्निमुद्वास्य हृदये पुनः ।
विहरेद्देववद्भूमौ सर्वदुःखविवर्जितः ॥

प्राणाकर्षणम्—

प्राणप्रतिष्ठामन्त्रेण मृतदेहं तु संस्पृशन् ।
जपित्वाऽस्त्रमनुं तस्मिन् जीवसूक्ताष्टकं जपेत् ॥

---

*हरः इति ख, ग, घ मातृकापाठः ।

न्यासध्यानक्रियामन्त्रविपर्यांश्चेत् पृथक्पृथक् ।
वक्ष्यामि मन्त्रविच्छ्रुतौ मृतोत्थापनकर्मणि ॥

* नातिबालं तथा वृद्धं ब्रह्मशापहतं तथा ।
पूतिगन्धयुतं देहं विकलाङ्गं च वर्जयेत् ॥

प्रयोगान्तरम्—

गुह्याद्गुह्यतरं यत्तु मृत्योर्हृदयकं परम् ।
हिताय सर्वजगतां वक्ष्ये रहसि तच्छृणु ॥

त्रिधाऽऽकाशोदरच्छिद्रश्चतस्रो मेखलास्ततः ।
कार्याः कुण्डस्य तत्राग्निं ज्वालयित्वा यथाविधि ॥

गुणात्मकेन तोयेन मेखलास्वभिपूर्य च ।
यथोक्तदूर्वात्रितयैर्मन्त्रेणानेन यो हुनेत् ॥

देवसाहस्रिकोदन्तं मृत्युर्थिभ्यति दर्शनात् ।

प्रयोगान्तरम्—

मध्वक्तदूर्वया होमात् श्रियमाप्नोति पुष्कलाम् ।
आज्याक्तया यशः स्फीतं हेमसिद्धिर्गुळाक्तया ॥

दध्यक्तयाऽनुरक्तिं च विद्यां ब्रह्मरसाक्तया ।
पञ्चगव्याक्तया होमात् ब्रह्महापि विशुध्यति ॥

नारिकेळाक्तया कान्तिमारोग्यं तैलसिक्तया ।
मृत्योः पाशं छिनत्याशु मुक्तिः पाशादिवेश्वरि ॥

क्षीराद्वेदगुणं क्षौद्रं तद्गुणाद्द्विगुणं गुळम् ।
घृतं भूतगुणं विद्यात्तावद्दूर्वारसः स्मृतः ।

* अतिबालं इति पाठेन भाव्यमिति भाति ।

हेमपात्रे तु संपूर्य रसं दूर्वारसोत्तरम् ॥

तस्मिन्नक्त्वा हुनेद्दूर्वात्रितयैरयुतत्रयम् ।
त्रिसहस्राधिकं विद्याद्ब्रह्मकल्पो भवेत् ध्रुवम् ॥

तत्पात्रं गुरवे दद्यात् दक्षिणां च गवां शतम् ।
ब्रह्मणो मनुना होमात् जीवेद्वर्षशतं नरः ॥

त्रैयम्बकेन त्रिशतं नृसिंहेन तु षट्शतम् ।
त्रिवृता मनुना होमात् सहस्रायुर्भवेन्नरः ॥

द्रव्यं तु पूर्वोक्तमेव ॥

प्रयोगान्तरम्—

आपत्सु जुहुयादेवं दूर्वया स्वरसाक्तया ।
मन्त्रेण त्रिवृता मूर्तिं मृत्युं तर्तुं न संशयः ॥

नृसिंहमन्त्रेणैव प्रयोगान्तरम्—

दैवज्ञैश्च निमित्तैश्च सामुद्रिकादिलक्षणैः ।
दुस्स्वप्नैर्व्याधिभिर्वापि प्रकृतेर्वा विपर्ययात् ॥

आयान्तं मृत्युमालोक्य होमेनैव निवारयेत् ।
ज्योतिषा वा दशासन्धौ चक्रे वा पुण्यपापयोः ॥

जन्मर्क्षे देवताकोपे ब्रह्मशापे विशेषतः ।
होतव्यं सम्यगुक्तेऽग्नौ दक्षिणां च यथाविधि ॥

नावज्ञेयो यतो मृत्युः कर्तव्यं चात्मरक्षणम् ।
जपेद्वा यदि दुस्स्वप्ने दृष्टमात्रे जले स्थितः ॥

अम्भोधिगायामवगाह्य चान्तः हृत्पुण्डरीके नृहरिं विचिन्त्य ।
जपेत्सहस्रत्रितयं घृताक्तो मग्नोऽप्सु मन्त्रं मनसा य एनम् ॥

जपेत्स मृत्युं निकटे स्थितं वा कामं सकोपं दुरितं च कोपात् ।
राज्यं परेषां नृपतिस्स शत्रुं सर्वात्मना किं पुनरात्मनोन्यम् ॥

चैत्रे मासे तु राकायां कृत्वा चक्रं तु मण्डलम् ।
कृष्णाजिने तिलान् स्थाप्य तेषु ताम्रघटं न्यसेत् ॥

निजमानमितेनास्मिन्नाज्येनैव तु पूर्य च ।
कृत्वा प्रतिकृतिं हेम्ना पलमानेन निक्षिपेत् ॥

तस्मिन्नावाह्य देवेशमर्चयित्वा नृकेसरिम् ।
अन्वीक्ष्य चात्मनः छायां तद्यन्मे मन इत्यृचा ॥

तत्सर्वं द्विजमुख्याय पूजिताय निवेदयेत् ।
निराहारस्तु तां रात्रिं क्षपयेच्च मनुं जपन् ।
प्रभाते भोजयेद्विप्रान् अर्चयित्वा जनार्दनम् ॥

आचार्यमपि सन्तोष्य स्वयं भुञ्जीत बन्धुभिः ।
एवं करोति यो मन्त्री दीर्घमायुस्स विन्दति ॥

राज्यैश्वर्यं तदाधीनं भवेत्संवत्सरात् ध्रुवम् ।
अन्वयेपि न जायन्ते व्याधयस्तस्य कर्मजाः ॥

मृत्युश्च न भवेदेषामकाले यस्य कस्यचित् ।

नृसिंहमन्त्रेण प्रयोगान्तरम्—

सर्वतोमुखमाक्षिप्य पर्वतोपममुत्क्षिपेत् ।
अनेन खादिराहुत्या स्तम्भयेदपि जाह्नवीम् ॥

प्रयोगान्तरम्—

रिपूनुच्चाटयेत् क्षिप्रं पायसाहारहोमतः ।

ओं भूः ओं भुवः ओं सुवः ओं महः ओं जनः ओं तपः ओं सत्यं

ओं तत्सवितुर्वरेण्यं ओं घृणिस्सूर्य आदित्य ओं तत्सत् ओं हंसात्मको यो अपामग्नेस्तेजसा दीप्यमानः स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिः हाहि हाहि हाहि हावु हावु हावु ओं ह्रीं हंसः सोहं स्वाहा, ओं भुवः भर्गो देवस्य धीमहि, ओं नमो नारायणाय, क्ष्रौं उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतो-मुखं, नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं, भ्राजा भ्राजा भ्राजा यत्रे ययायवों आधातोरण्याय ययों, सहस्रज्वालिनी मृत्युनाशिनी स्वाहा, ओं सुवः धियो यो नः प्रचोदयात्, आमद्य ओं ह्रीं ओं नमश्शिवाय, त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्[1] व वात्रं व व चं व वं वेन वेयं वत्रं वे सजज्ञदौंश ह्रीं अरे वं वं मेवरयु धावया दं जं ओं जुंमः स्वौं हंसः मां पालय पालय ह्लादय ह्लादय मृत्योर्मोचय मोचय सोहं स्वौं २ ईं हंसः जुं ओं ईं स्वौं हंसः मां पालय पालय ह्लादय ह्लादय मृत्योर्मोचय मोचय सोहं स्वौं ईं सः जुं ओं, परो रजसे सावदों, आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्स्वरों ॥ इति महामृत्युञ्जयमन्त्रः ॥